
# द्वादशः पाठः । अमरकोषः ।



- शब्दसङ्ग्रहस्य कृते भिन्नभाषासु के शब्दाः प्रयुक्ताः ?
- युष्माकं गृहे/विद्यालये के शब्दकोषाः सन्ति ?
- के शब्दसङ्ग्रहाः युष्माभिः पठिताः ?

संस्कृतभाषा अतीव समृद्धा भाषा। एकस्य शब्दस्य भवन्ति नैके समानार्थकशब्दाः। क्वचित् एकस्य शब्दस्य विविधाः अर्थाः अपि भवन्ति। अध्येतॄणां सुखबोधाय समानार्थकशब्दानां पद्यमयीं रचनां कृत्वा पण्डित-अमरसिंहेन अमरकोषः ग्रथितः। अमरकोषपठनेन कण्ठस्थीकरणेन च शब्दज्ञानं भवति। विविधशब्दानां वाक्ये प्रयोगेण शब्दप्रभुत्वं सिध्यति। यथेष्टं गृह्णन्तु शब्दरत्नानि अस्मात् शब्दरत्नाकरात्। अमरकोषप्रशंसा -

कवेरमरसिंहस्य कृतिरेषा सुनिर्मला।
आचन्द्रतारकं स्थेयात् नामलिङ्गानुशासनम् ।।




(छात्राः ग्रन्थालये विविधानि पुस्तकानि पश्यन्ति अध्यापिकां प्रश्नान् च पृच्छन्ति।)

नयनः - आचार्ये, का एषा भिन्ना विशाला कपाटिका ? अहो ! कियन्तः विविधाः कोषाः एतस्यां वर्तन्ते !

अध्यापिका - आम्, सर्वेषां शास्त्राणाम् अध्ययनार्थम् एते कोषाः आवश्यकाः।

सुमेधा - कोषः नाम किम् ?

अध्यापिका - कोषः नाम सङ्ग्रहः। यथा वयं वित्तकोषे धनस्य सङ्ग्रहणं कुर्मः तथैव भाषाकोषे शब्दानां सङ्ग्रहः भवति।

श्रेया - कः तस्य उपयोगः ?

अध्यापिका - सुयोग्यः प्रश्नः। सम्भाषणे लेखने च भाषाप्रभुत्व-प्राप्त्यर्थं तथैव नैकेषां विषयाणां ज्ञानप्राप्त्यर्थं शब्दसम्पत्तेः सङ्ग्रहणम् अतीव आवश्यकम्। अस्माकं ग्रन्थालये संस्कृतिकोषाः, चरित्रकोषाः, विश्वकोषाः सुभाषितकोषाः च इत्यादयः बहवः कोषाः वर्तन्ते। तेषु 'अमरकोषः' नाम कश्चन विशेषः कोषः।

स्वप्नीलः - अमरकोषः ? 'अमरकोषः' इति नाम किमर्थम् ? किं विद्यते अस्मिन् कोषे ?

अध्यापिका- एषः संस्कृतशब्दानां सङ्ग्रहग्रन्थः। अमरसिंहः नाम पण्डितः एतस्य रचयिता। अतः कोषस्य नाम 'अमरकोषः' इति। पुरातनकाले यदा छात्राः अध्ययनार्थं गुरुकुलं प्रविशन्ति स्म तदा अध्ययनारम्भे ते अमरकोषं कण्ठस्थं कुर्वन्ति स्म। अधुना अपि तथैव प्रवर्तते।

आर्या - (साश्चर्यम्) किं कोषः कण्ठस्थीकर्तुं शक्यः ? तेन कः लाभः भवति ?

अध्यापिका - अथ किम्! पद्यमयः एषः ग्रन्थः गेयः। अतः श्लोकानां, सुभाषितानां पठनम् इव तस्य कण्ठस्थीकरणम् अतीव सुलभम्। तत्र एकस्य शब्दस्य कृते नैके समानार्थकशब्दाः वर्तन्ते। क्वचित् एकस्य शब्दस्य नैके भिन्नाः अर्थाः अपि वर्तन्ते। अतः तस्य पठनेन अस्माकं शब्दसम्पत्तिः वृद्धिं गच्छति। अस्माकं स्मरणशक्तिः धारणाशक्तिः च वर्धेते, उच्चारणमपि शुद्धं भवति।

नयनः - वयमपि अमरकोषं कण्ठस्थं कुर्याम। तस्मिन् कति श्लोकाः सन्ति ?

अध्यापिका – उपसार्धसहस्रं (१५००) श्लोकाः सन्ति। तत्र त्रीणि काण्डानि सन्ति। अतः 'त्रिकाण्डकोषः' इति एतस्य अपरं नाम। तथा 'नामलिङ्गानुशासनम्' इति नाम्ना अपि विख्यातः एषः कोषः।

सुमेधा – 'नामलिङ्गानुशासनम्' इति शब्दस्य कः अर्थः ?

अध्यापिका– तदपि अस्य ग्रन्थस्य अपरं वैशिष्ट्यम्। अत्र न केवलं समानार्थकशब्दाः अपि तु तेषां लिङ्गनिर्देशः कृतः। तेन भाषायाः आकलनं प्रयोगः च सुकरः भवति।

स्वप्नीलः – आचार्ये, तेन वयं संस्कृतकाव्यानि नाटकानि च विनायासं पठितुं शक्नुमः खलु।

अध्यापिका – निश्चयेन ! तर्हि इतःपरं सर्वैः अमरकोषस्य पठनम् अवश्यं कर्तव्यमेव।

## भाषाभ्यासः



**१. एकवाक्येन उत्तरत।**

अ) कोषाः किमर्थम् आवश्यकाः ?

आ) कोषः नाम किम् ?

इ) कः अमरकोषस्य रचयिता ?

ई) अमरकोषस्य कण्ठस्थीकरणं कस्मात् सुलभम् ?

उ) अमरकोषे कति श्लोकाः सन्ति ?

ऊ) अमरकोषस्य किम् अन्यत् नामद्वयम् ?

**२. माध्यमभाषया लिखत।**

१. 'अमरकोष'– कण्ठस्थीकरणेन के लाभाः भवन्ति ?

**३. प्रश्ननिर्माणं कुरुत।**

१. वयं वित्तकोषे धनस्य सङ्ग्रहं कुर्मः।   २. अमरकोषः संस्कृतशब्दानां सङ्ग्रहग्रन्थः।

**४. अ) शब्दस्य वर्णविग्रहं कुरुत।** (१) सङ्ग्रहम् (२) प्रयोगः (३) वर्तन्ते (४) क्वचित्

**आ) मेलनं कुरुत।**

| विशेष्यम् | विशेषणम् |
|---|---|
| १. कपाटिका | १. सुलभम् |
| २. कोषग्रन्थः | २. विशाला |
| ३. कण्ठस्थीकरणम् | ३. भिन्नाः |
| ४. अर्थाः | ४. पद्यमयः |

**५. सूचनानुसारं वाक्यपरिवर्तनं कुरुत।**

१. छात्राः अमरकोषं कण्ठस्थं कुर्वन्ति स्म। ('स्म' निष्कासयत)

२. तेन कः लाभः भवति ? (बहुवचने लिखत।)

३. वयमपि अमरकोषं कण्ठस्थं कुर्याम। (एकवचनं कुरुत।)

**६. समानार्थकशब्दं लिखत।** कोषः, अमरकोषः, विख्यातः, सुलभम्।

**७. वाक्यं शुद्धं कुरुत।**

१. ग्रन्थालये कोषाय कृते एका विशाला कपाटिका विद्यते।

२. छात्राः ग्रन्थालये विविधं पुस्तकानि पश्यन्ति।

३. अमरकोषे तिस्रः काण्डानि सन्ति।

CKFVL6